ऋतधामा च तत्रेन्द्रस्तारको नाम तद्रिपुः।
हरिर्नपुंसको भूत्वा घातयिष्यति शङ्कर!॥
इति गारुडे ८१ अध्याये ॥
(अपरोऽसुरविशेषः। कार्त्तिकेयः एनं निहतवान्। यथा, मत्स्यपुराणे। १४५। ५—११।
"वज्राङ्गो नाम दैत्योऽभूत्तस्य पुत्त्रस्तु तारकः।
सुरानुद्वासयामास पुरेभ्यः स महाबलः॥
ततस्ते ब्रह्मणोऽभ्यासं जग्मुर्भयनिपीड़िताः।
भीतांश्च त्रिदशान् दृष्ट्वा ब्रह्मा तेषामुवाच ह॥
सन्त्यजध्वं भयं देवाः! शङ्करस्यात्मजः शिशुः।
तुहिनाचलदौहित्रस्तं हनिष्यति दानवम्॥
ततः काले तु कस्मिंश्चित् दृष्ट्वा वै शैलजां शिवः।
स्वरेतो वह्निवदने व्यस्जत्कारणान्तरे॥
तत्प्राप्तं वह्निवदने रेतो देवानतर्पयत्।
विदार्य्य जठराण्येषां व्यजीर्णं निर्गतं मुने!॥
पतितं तत् सरिद्वरे ततस्तु शरकानने।
तस्मात्तु स समुद्भूतो गुहो दिनकरप्रभः।
स सप्तदिवसो बालो निजघ्ने तारकासुरम्॥"
अस्य विशेषविवरणन्तु तत्रैव१४५अध्यायमारभ्य १५६ अध्यायेषु द्रष्टव्यम्॥ तारयतीति। तॄ+णिच्+ण्वुल्।) कर्णधारः। इति मेदिनी। के, ६६॥ भेलकः। इति शब्दरत्नावली॥ (तरणोपायः। यथा, हठयोगप्रदीपिकायाम्।४।४०।
"केचिदागमजालेन केचिन्निगमसङ्कुलैः।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम्॥"
"तारयतीति तारकस्तं तारकं तरणोपायं नैव जानन्ति।" इति तट्टीका॥ महादेवः। यथा, महाभारते। १२। २८४। ३५।
"गर्भमांसशृगालाय तारकाय तराय च।
नमो यज्ञाय यजिने हुताय प्रहुताय च॥")
त्रातरि, त्रि। इति मेदिनी। के, १००॥ (यथा, प्रबोधचन्द्रोदये। २। १३।
"कथयति भगवान् इहान्तकाले
भवभयकातरतारकं प्रबोधम्॥"
स्त्रियां टापि अत इत्वम्। यथा, गोः रामायणे। २। ६७। २३।
"नारीणां तारिकाः काश्चित् काश्चित् परमवाजिनाम्॥")

तारकजित्, पुं, (तारकं तारकासुरं जयतीति। जि+क्विप् तुगागमश्च।) कार्त्तिकेयः। इत्यमरः। १।१।४२॥ (एतद्विवरणं मात्स्ये १५६ अध्याये द्रष्टव्यम्॥)

तारकब्रह्म, क्ली, (तारकं संसारसागरपारकारकं ब्रह्म।) षड़क्षरमन्त्रविशेषः। यथा,—
"षड़क्षरं महामन्त्रं तारकं ब्रह्म उच्यते।
ये भजन्ति च मां भक्त्या तेषां मुक्तिर्न संशयः॥
रामाय नम इत्येवमुच्चार्य्य मन्त्रमुत्तमम्।
मन्त्रेहुःखहरश्चैतत् पापिनामपि मुक्तिदम्॥
इमं मन्त्रं जपञ्चित्यममलत्वं भविष्यसि।
भस्माश्चिधारणादूयस्तु सम्भूतश्चाशुचिस्त्वयि॥
मङ्गलं तदभूत् सर्व्वं मन्त्रोच्चारणात् शुभात्।
त्वमर्थ्यनेन श्रीरामतारकाख्येन मन्त्रतः॥
भूत्वा काश्यां विश्वनाथो महाशापरिपालकः।
श्रुत्वा मुक्तान् जीवमात्रान् मानुषादीन् परं पदम्॥
अन्यत् किन्ते भयं मन्त्रप्रभावात् प्रापयिष्यसि।
इति सन्दिश्य मां विष्णुर्विससर्ज्ज मरुद्गणान्॥"
इति पाद्मोत्तरखण्डे शिवं प्रति श्रीविष्णुवाक्यम्॥ अपि च।
"मुमूर्षोर्मुनिकर्णान्तु अर्द्धोदकनिवासिनः।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम्॥
ओँ श्रीरामरामरामेत्येतत्तारकमुच्यते।
अतस्त्वं जानकीनाथ! परं ब्रह्म विनिश्चितम्॥"
इति पाद्मोत्तरखण्डे श्रीरामं प्रति श्रीशिववाक्यम्॥

तारका, स्त्री, क्ली, (तरति तारयति वा। तॄ+णिच्+ण्वुल्। टाप्। "तारका ज्योतिषि।" ७।३।४५। इत्यस्य वार्त्तिकोक्त्या न अत इत्वम्।) नक्षत्रम्। (यथा, मार्कण्डेये।१५।७१।
"अप्-विन्दवो यथाम्भोधौ यथा वा दिवि तारकाः।
यथा वा वर्षतो धारा गङ्गायां सिकता यथा॥")
कनीनिका। इति मेदिनी। के, १००॥
(यथा, रघुः। ११। ६९।
"चत्रकोपदहनार्च्चिषं ततः
सन्दधे दृशमुदग्रतारकाम्॥")
इन्द्रवारुण्यां स्त्री। इति राजनिर्घण्टः॥

तारकारिः, पुं, (तारकस्य तारकासुरस्य अरिः।) कार्त्तिकेयः। इति हेमचन्द्रः। २। १२३॥

तारकिणी, स्त्री, (तारकाः सन्त्यत्र। तारका+इनिः ङीप्।) रात्रिः। इति राजनिर्घण्टः॥

तारकितं, त्रि, (तारकाः सञ्जाता अस्य। तारका+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५।२।३६। इति इतच्।) तारकायुक्तम्। यथा,—
"सिति निशा दृशदि स्फुटदुत्पतत्
कणगणाधिपतारकिताम्बरः॥"
इति नैषधम्॥

तारणः, पुं, (तारयतीति। तॄ+णिच्+ल्युः।) भेलकः। इति शब्दरत्नावली॥ (संसारसागरात् तारयतीति। विष्णुः। यथा, महाभारते।१३। १४९। ५०।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः॥"
महादेवः। यथा, तत्रैव। १३। १७। ११७।
"तोरणस्तारणो वातः परिधीपतिखेचरः॥"
क्ली, षष्ठिवत्सरेषु अष्टादशवत्सरः। यथा, ज्योतिषतत्त्वे।
"अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं तारणे सुरवन्दिते!॥"
तथाच बृहत्संहितायाम्। ८। ३६।
"तारणं तदनु भूरिवारिदं
शस्यवृद्धिमुदितञ्च पार्थिवम्॥"
तॄ+णिच्+भावे ल्युट्। उत्तारणम्। उद्धारणम्। यथा, महाभारते। ४। ६। ५३।
"तारणायास्य दुःखस्य प्रस्थानाय जयाय च॥")
तरणकारयितरि, त्रि॥

तारणिः, स्त्री, (तारयतीति। तॄ+णिच्+अनिः।) नौका। इति हारावली। ५६॥

तारतण्डुलः, पुं, (तारं मुक्तेव शुभ्रस्तण्डुलो यस्य।) धवलयावनालः। इति राजनिर्घण्टः॥

तारतम्यं, क्ली, तरतमयोर्भावः। (तरतम+ष्यञ्।) न्यूनाधिक्यम्। यथा,—
"निर्द्धनं निधनमेतयोर्द्वयो-
स्तारतम्यविधिमुग्धचेतसा।
बोधनाय विधिना विनिर्म्मिता
रेफ एव जयवैजयन्तिका॥"
इत्युद्भटः॥

तारदी, स्त्री, (तरदी एव। स्वार्थे अण् ततो ङीष्।) तरदीवृक्षः। इति राजनिर्घण्टः॥

तारपुष्पः, पुं, (तारं रूप्यमिव शुभ्रं पुष्पं यस्य।) कुन्दवृक्षः। इति राजनिर्घण्टः॥

तारलः, त्रि, (तरल एव। स्वार्थे अण्।) विटः। इति भूरिप्रयोगः॥

तारविमला, स्त्री, (तारं रूप्यमिव विमला।) धातुविशेषः। इति शब्दार्थकल्पतरुः॥

तारशुद्धिकरं, क्ली, (तारस्य रजतस्य शुद्धिं करोतीति। कृ+टः।) सीसकम्। इति राजनिर्घण्टः॥

तारा, स्त्री, पुं, (तारयतीति। तॄ+णिच्+अच्।) नक्षत्रम्। इत्यमरः। १। ३। २१॥ (यथा, महाभारते। १। २११। २६।
"चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः॥")
यथाच कर्म्मलोचने।
"एकतारं नभो दृष्ट्वा सन्ध्यां नारदो मुनिः।
तावद्भवति चाण्डालो यावदन्यां न पश्यति॥"
अक्षिमध्यम्। इति मेदिनी। रे, ४३॥ शेषस्य पर्य्यायः। विम्बिनी २ कनीनिका ३। इति राजनिर्घण्टः॥ तारका ४। इत्यमरः।१।३।२१॥
(यथा, हठयोगप्रदीपिकायाम्। ४। ३६।
"तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद्भ्रुवौ॥")

तारा, स्त्री, (तारयति तापादिति। तॄ+णिच्+अच्+टाप्।) बुद्धदेवताभेदः। बृहस्पतिभार्य्या। इति मेदिनी। रे, ४३॥ (यथा, देवीभागवते। १। ११। ७५।
"ततः कालेन कियता तारासूत सुतं शुभम्॥")
वालिभार्य्या। सा सुषेणवानरकन्या। इति रामायणम्॥ (यथा, महाभारते।३।२७९।१८।
"हेममाली ततो वाली तारां ताराधिपाननाम्।
उवाच वचनं वाग्मी तां वानरपतिः पतिः॥")
चोड़ा। मुक्ता। इति राजनिर्घण्टः॥ * ॥
द्वितीया शक्तिः। यथा,—
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती।
तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी॥
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तिता॥"